# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा –** आचार्यः -१ (SEM-1) | **प्रश्नपत्रम् -३**<br>(CC 4.1.2) | **गुणाः –** ७० |
| **विषयः-** नव्यन्यायः | | **ग्रन्थः-** हेत्वाभाससामान्यनिरुक्तिः |
| **दिनाङ्कः –** १७/१२/२०१८ | | समयः – २ तः ५ |

### विभागः १

**प्रश्नः १ निम्नलिखितयोः द्वयोरेकस्य समाधानं सप्रसङ्गं लिखत।** ०५

१ प्रसङ्गसङ्गतिं व्याख्यात।

२ तत्त्वनिर्णयविजयप्रयोजकौ व्याख्यात।

**प्रश्नः २ निम्नलिखितयोः द्वयोरेकस्य निबन्धात्मिका व्याख्या कार्या।** १०

१ यथाश्रुतमिदं हेतुदोषाणां लक्षणमिति दीधितिपङ्क्तेः तात्पर्यं यथाग्रन्थं विवृणुत।

२ अनुमितिपदस्य सार्थक्यं यथाग्रन्थं व्याख्यात।

### विभागः २

**प्रश्नः ३ निम्नलिखितयोः द्वयोरेकस्य उत्तरं सन्दर्भसहितं देयम्।** ०५

१ हेत्वाभासशब्दार्थं व्याख्यात।

२ अनुमितिपदस्य तत्करणपरत्वे बाधादावव्याप्तिं व्याख्यात।

**प्रश्नः ४ निम्नलिखितयोः एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत।** १०

१ साक्षात्कारघटितकल्पं समन्वयपूर्वकं व्याख्यात।

२ “साध्यव्याप्यहेतुमान् पक्षः साध्यवानित्याकारकानुमितिपरं वा” इति दीधितिपङ्क्तिं विवृणुत।

### विभागः ३

**प्रश्नः ५ निम्नलिखितयोः द्वयोरेकस्य सन्दर्भव्याख्या देया।** ०५

१ लिङ्गोपादानमते हेतोः संसर्गताभ्युपगमः आवश्यको न वेति प्रतिपादयत।

२ ‘न हि सामानाधिकरण्येन बाधसिध्योः सत्योः कश्चिदनुमितिमुपैति’ कुत इति व्याख्यात।

**प्रश्नः ६ निम्नलिखितयोः एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत। १०**

१ 'एकत्र हेतौ व्यभिचारादिग्रहेऽपि अन्यस्य परामर्शादनुमित्युत्पादेन व्यभिचारात्' इति पङ्क्तिं व्याख्यात।

२ लक्षणे यथार्थपदसार्थक्यं यथाग्रन्थं विवृणुत।

**विभागः ४**

**प्रश्नः ७ निम्नलिखितयोः एकस्य उत्तरं सन्दर्भसहितं देयम्। ०५**

१ प्रत्येकं हेत्वाभासापत्तिं व्याख्यात।

२ दीधितिकारस्य परिचयं लिखत।

**प्रश्नः ८ निम्नलिखितयोः एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत। १०**

१ दुष्टानामेव हेतूनामेतानि लक्षणानीति केचित्तु मतं यथाग्रन्थं निरूपयत।

२ आद्यस्यैव दुष्टहेतुलक्षणाभिप्रायकत्वमिति प्राहुः इति दीधितिं व्याख्यात।

**प्रश्नः ९ निम्नलिखितप्रश्नेषु दशप्रश्नानामुत्तराणि एकवाक्येन यच्छन्तु। १०**

१ साध्यवत्ताज्ञाने प्रमात्वनिश्चयः कः ?

२ हेत्वाभासस्य विजयप्रयोजकत्वं कथम् ?

३ मूलोक्तलक्षणानां दुष्टहेतुलक्षणत्वे को दोषः ?

४ प्रमात्वनिश्चयः कः ?

५ अनुमितिपदस्यानुमितिसामान्यपरत्वे को दोषः ?

६ अनुमितिनिष्ठकार्यतानिरूपकसम्बन्धित्वेनाऽनुमितितत्करणज्ञानपरं किम् ?

७ 'सपरिकरं हेतुं निरूप्य' अत्र परिकरः किम् ?

८ लिङ्गोपादानमतवादिनः कः ?

९ मेयत्वस्य व्यभिचारी कः ?

१० मणिकारः कः कथ्यते ?

११ दीधितिव्याख्याकारः कः ?

१२ यथार्थेति पदं व्यर्थं कस्मात् ?

१३ ह्रदो वह्निमान् धूमादिति कीदृशं ज्ञानम् ?

१४ अथ विशिष्टविषयकं ज्ञानं ..................। पूरयत।

१५ हेत्वाभाससामान्यलक्षणं किम् ?

-----xxxxxx------